# संस्कृत (संस्कृतम्)

## द्वितीय प्रश्न पत्र : (काव्यम् अर्थावबोधः व्याकरणं निबन्धश्च)

समयावधि : घण्टात्रयम् | पूर्णाङ्का : 100

1. अधोलिखितेषु कयोः द्वयोः श्लोकयोः सप्रसङ्गं व्याख्या कार्या–

(क) यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते।।

(ख) एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रविप्लवः।।

(ग) यस्तु पक्वमुपादत्ते काले परिणतं फलम्।
फलाद् रसं स लभते बीजाच्चैव फलं पुनः।।

(घ) गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः।। 6 + 6

2. अधोलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानां उत्तराणि देयानि– 2+2+2+2

(क) कौ द्वौ पुरुषौ स्वर्गस्यापरि तिष्ठतः?

(ख) के पञ्चाग्नयः मनुष्येण प्रयत्नतः परिचर्याः?

(ग) के षड् गुणाः पुंसां कदाचन न हातव्याः?

(घ) के षड् जनाः नित्यदुःखिताः सन्ति? (ङ) कीदृशः राजा न शीर्येत्?

(च) अवलिप्तानां के त्रयः मदाः?

(छ) प्रायेण केषां भोक्तुं शक्तिर्न विद्यते? (ज) स्त्रीणां बलं किं भवति?

3. निम्नलिखितेषु कयोः द्वयोः श्लोकयोः ससन्दर्भा व्याख्या करणीया–

(क) वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारिणः।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम्।।

(ख) न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरूह्यते
नराधिपैर्माल्यमिवास्य शासनम्।।

(ग) अखण्डमाखण्डलतुल्य धामभिः
चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता
मतंगजेन स्रगिवापवर्जिता।।

(घ) अथ क्षमामेव निरस्तविक्रम–
श्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सञ्जुहुधीह पावकम्।। 6 + 6

4. केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि देयानि–

(क) केदृशं वचः दुर्लभम्?

questionpaperesult.com

Scanned by CamScanner

(ख) बलवद् विरोधिता कीदृशी भवति? (ग) धनञ्जयः कस्य नाम आसीत्?

(घ) किरातार्जुनीयम् महाकाव्यस्य कथानकं महाभारतस्य कस्मात् पर्वणः गृहीतः?

(ङ) के षड् रिपवः?

(च) दुर्योधनस्य सत्क्रिया केन विना न भवति?

(छ) किरातार्जुनीय–महाकाव्यस्य प्रथमे सर्गे कतमः छन्दः अस्ति?

(ज) गुप्तचाराणां गिरः कीदृशः भवन्ति? 2+2+2+2

5. निम्नलिखितेषु कयोः द्वयोः श्लोकयोः सप्रसंगं व्याख्या कार्या–

(क) जाड्यं धियो हरति सिञ्चति वाचि सत्यं,
मानोन्नतिं दिशति पापम् अपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं,
सत्संगतिः कथय किं न करोति पुंसाम्।।

(ख) सत्यानृता च परुषा प्रियवादिनी च,
हिंस्रा दयालुरपि चार्थपरा वदान्या।
नित्यव्यया प्रचुरनित्य धनागमा च,
वाराङ्गनेव नृपनीतिरनेक रूपा।।

(ग) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

(घ) पद्माकरं दिनकरो विकचं करोति,
चन्द्रो विकासयन्ति कैरवचक्रवालम्।
नाभ्यर्थितो जलधरोऽपि जलं ददाति,
सन्तः स्वयं परहिते विहिताभियोगाः।। 6+6

6. अधोलिखितेषु प्रश्नेषु केषाञ्चित् चतुर्णां प्रश्नानाम् उत्तराणि देयानि–

(क) खलसज्जानानां मैत्री कीदृशी भवति?

(ख) महता चितं सम्पत्सु कीदृशं भवेत्?

(ग) सत्पुरूषाः के भवन्ति? (घ) सज्जनानां कायः कैः विभाति?

(ङ) सर्वविदां समाजे पण्डितानां किं विभूषणम्?

(च) मनस्विनः का द्वयी वृतिः? (छ) कं नरं ब्रह्मापि न रञ्जयति?

(ज) कतमः धर्मः परम गहनो योगिनाम्प्यगम्यः? 2+2+2+2

7. अधोलिखितेषु विषयेषु कमप्येकं विषयमधिकृत्यं संस्कृतभाषायां निबन्धो लेखनीयः–

(क) पर्यावरणप्रदूषणम्।

(ख) वर्त्तमाने संस्कृतभाषायाः महत्तवम् (ग) कन्याभ्रूणहत्या।

(घ) मम प्रियः कविः। 10

8. निम्नलिखितगद्यांशं पठित्वा प्रश्नानामुत्तराणि संस्कृतभाषायां देयानि–

सते अर्थात् कल्याणाय हितं सत्यं भवति। यद् वस्तु यथा विद्यते, तस्य तेनैव रूपेण

questionpaperesult.com

Scanned by CamScanner

कथनं, प्रकाशनं, लेखनं वा सत्यमिति अभिधीयते। परमेश्वरेण जिह्वा सदुपयोगार्थं दत्ता, अतः जिह्वायाः सदुपयोगः सत्यभाषाणेन कर्त्तव्यः।

जगति सत्यस्य यादृशी आवश्यकता विद्यते, न तादृशी अन्यस्य कस्यचिद् वस्तुनः। सत्येनैव समाजस्य स्थितिः वर्तते। यदि सर्वेऽसत्यवादिनो भवेयुः तर्हि न लोकस्य स्थितिः क्षणमात्रमपि भवितुं शक्नोति। सत्यस्यैव एष महिमा यद् वयं समाजे मनुष्येषु विश्वासं कुर्मः। अतः सिध्यति यत् सत्यं लोकस्याधारो अस्ति। अतएवोच्यते–

गोभिर्विप्रैश्च वैदैश्च, सतीभिः सत्यवादिभिः।
अलुब्धैदानशूरैश्च, सप्तभिः धार्यते मही।

सत्यभाषणेन मनुष्यो निर्भीको भवति।

(अ) उपर्युक्त–गद्यांशस्य शीर्षकं देयम्।

(आ) अधोलिखितानां प्रश्नानाम् उत्तराणि देयानि–

(1) किं सत्यमभिधीयते? (2) सत्यस्याधारो कः अस्ति?

(3) कैः सप्तभिः मही धार्यते?

(4) केन कारणेन वयं समाजे मनुष्येषु विश्वासं कुर्मः?

(5) सत्यभाषणेन किं भवति? 1+1+1+1+1

(इ) उपर्युक्त गद्यांशस्य संस्कृतभाषायां संक्षिप्तीकरणं क्रियताम्। 3

9. अधोलिखितेषु सूत्रेषु कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या–

(क) शेषात् कर्त्तरि परस्मैदम्। (ख) लोटो लङ्वत्।

(ग) स्वादिभ्यः श्नुः। (घ) आमेतः। 2½ + 2½

10. अधोलिखितेषु पदेषु केषाञ्चित् पञ्चपदानां सूत्रोल्लेखपूर्वकं सिद्धिः कार्या–

(क) भवसि। (ख) भवानि।

(ग) एधेते। (घ) जुहुयात्।

(ङ) अचोरयत्। (च) तनोमि।

(छ) रूणाद्धि। (ज) देविष्यति।

(झ) क्रीणीतः। (ञ) आदः। 3+3+3+3+3

questionpaperesult.com

Scanned by CamScanner